## दशमः पाठः

# आजादचन्द्रशेखरः



(आचार्यः कक्षायां शिक्षयति)

आचार्यः — भो रमे! श्वः कः दिनाङ्कः अस्ति?

रमा — श्वः जुलाईमासस्य त्रयोविंशतिदिनाङ्कः अस्ति।

आचार्यः — जुलाईमासस्य त्रयोविंशतिदिनाङ्कः किमर्थं प्रसिद्धः?

प्रिया — अस्मिन्नेव दिनाङ्के आजादचन्द्रशेखरस्य जयन्त्याः उत्सवः आयोज्यते।

आचार्यः — चन्द्रशेखरस्य जन्म कस्मिन् ख्रिस्ताब्दे अभवत्?

विभुः — चन्द्रशेखरस्य जन्म 1906 ख्रिस्ताब्दे अभवत्।

आचार्यः — सम्यगुक्तं भवता।

रमा — भो आचार्य! चन्द्रशेखरस्य जन्म कुत्र अभवत्?

आचार्यः — चन्द्रशेखरस्य जन्म मध्यप्रदेशे अलीराजपुरमण्डलान्तर्गते 'भाभरा' नामकग्रामे अभवत्।

प्रिया — भो आचार्य! कौ तस्य पितरौ?

आचार्यः — सीतारामतिवारी तस्य पिता, जगरानीदेवी च तस्य माता आसीत्।

विभुः — तस्य अध्ययनं कुत्र अभवत्?

आचार्यः — वाराणस्याम् एकस्मिन् संस्कृतविद्यालये तस्य अध्ययनं जातम्। सः संस्कृतम् अधीतवान्।

(साश्चर्यम् सर्वे अहो! एषः संस्कृतम् अधीतवान्)

पीयूषः — ततः सः किमकरोत्?

आचार्यः — वाराणस्यां संस्कृतविद्यालये अध्ययनं कुर्वन् एव पञ्चदशवर्षीयः चन्द्रशेखरः स्वतन्त्रतान्दोलने प्राविशत्। आङ्ग्लैः स्वाधीनतान्दोलनकारिणां दमनकाले सः पाषाणखण्डेन एकं रक्षकं प्राहरत्।

रमा — ततः किम् अभवत्?

आचार्यः — ततः प्रहरी तं निगृह्य न्यायालये प्रस्तुतवान्।

प्रिया — न्यायालये किं जातम्?

आचार्यः — न्यायालये न्यायाधीशेन तस्य आयुषो गणनानुसारं पञ्चदशवेत्रप्रहारैः सः दण्डितः।

विभुः — दण्डकाले चन्द्रशेखरस्य का प्रतिक्रिया अभवत्?

आचार्यः — प्रथमं तु चन्द्रशेखरन्यायाधीशयोः संवादं शृणुत—

न्यायाधीशः — किं तव नाम?

चन्द्रशेखरः — 'आजादः।'

न्यायाधीशः — किं तव पितुः नाम?

चन्द्रशेखरः — 'स्वाधीनः।'

न्यायाधीशः — कुत्र तव गृहम्?

चन्द्रशेखरः — कारागारः।

पीयूषः — ततस्ततः?


आचार्यः — ततस्तु वेत्रप्रहारैः चन्द्रशेखरः मूर्च्छापर्यन्तं 'जयतु भारतम्' इति उच्चैः अघोषयत्। तस्मात् कालादेव सः 'आजाद-चन्द्रशेखर' इति नाम्ना प्रसिद्धः।

रमा — स्वतन्त्रतायै सः किं कृतवान्?

आचार्यः — तेन 'हिन्दुस्तान सोसलिस्ट रिपब्लिकन आर्मी' इति स्वाधीनतासैनिकानाम् एकं सङ्घटनं कृतम्। तस्मिन् सङ्घटने भगतसिंह-राजगुरु-बटुकेश्वर-शिवराम-सुखदेवसदृशाः क्रान्तिकारिणः तस्य सहायकाः अभवन्। काकोरी-साईमनकमीशन-केन्द्रीय-असेम्बलीमध्ये आग्नेयास्त्रप्रक्षेपणादिषु सः शिरोमणिः।

प्रिया — कः तस्य आदर्शः?

आचार्यः — देशभक्तिः। अपि च तस्य जनकस्य सहायतार्थं मित्रैः प्रदत्तधनमपि सः क्रान्तिकार्येषु व्ययं कृतवान्।



विभुः — कथं कदा च तस्य बलिदानम् अभवत्?

आचार्यः — फरवरिमासस्य सप्तविंशतितमे दिनाङ्के 1931 ख्रिस्ताब्दे इलाहाबादनगरे (प्रयाग-नगरे) 'आजाद-उद्यानम्' (अल्फ्रेड पार्क) इति स्थाने आङ्ग्लगुप्त-चरेणाधीक्षकेण नॉट-बाबरेण गोलिकाभिः युद्ध्यमानः यदा आत्मानम् असहायम् अमन्यत तदा निग्रहभयात् स्वहस्तेनैव स्वकीये मस्तके गोलिकाप्रहारेण सः वीरगतिं प्राप्नोत्।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| जयन्त्याः | — | जयन्ती का | सङ्घटनम् | — | संघ को |
| ख्रिस्ताब्दे | — | ईस्वी में | आग्नेयास्त्रम् | — | बम |
| सम्यगुक्तम् | — | ठीक कहा | निग्रहभयात् | — | पकड़े जाने के भय से |
| निगृह्य | — | पकड़कर | वेत्रप्रहारैः | — | बेंत के प्रहारों से |
| मूर्च्छापर्यन्तम् | — | मूर्च्छित होने तक | | | |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत—**

क. चन्द्रशेखरस्य जन्म कस्मिन् ग्रामे अभवत्?

ख. चन्द्रशेखरस्य जन्म कस्मिन् मण्डले अभवत्?

ग. चन्द्रशेखरस्य मातुः नाम किम्?

घ. चन्द्रशेखरस्य पितुः नाम किम्?

ङ. चन्द्रशेखरः कां भाषाम् अधीतवान्?

**2. एकवाक्येन उत्तरं लिखत—**

क. चन्द्रशेखरस्य जन्म कदा अभवत्?

ख. चन्द्रशेखरस्य अध्ययनं कुत्र जातम्?

ग. चन्द्रशेखरेण केन नाम्ना सङ्घटनं कृतम्?

घ. स्वाधीनतान्दोलने के के चन्द्रशेखरस्य सहायकाः अभवन्?

ङ. चन्द्रशेखरः कथं वीरगतिं प्राप्नोत्?

**3. उचितं मेलयत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | चन्द्रशेखरः मूर्च्छितः | — | जयतु भारतम् |
| ख. | दण्डकाले चन्द्रशेखरः अघोषयत् | — | संस्कृतम् |
| ग. | काकोरीकाण्डस्य शिरोमणिः | — | वेत्रप्रहारैः |
| घ. | चन्द्रशेखरेण अधीतम् | — | नॉट-बाबरेण सह |
| ङ. | चन्द्रशेखरः अयुद्ध्यत् | — | चन्द्रशेखरः |

4. **नामोल्लेखपूर्वकं समास-विग्रहं कुरुत —**

क. संस्कृतविद्यालये

ख. पाषाणखण्डेन

ग. निग्रहभयात्

घ. वीरगतिम्

5. **अधोलिखितैः अव्ययैः वाक्यनिर्माणं कुरुत —**

क. कदा

ख. च

ग. एव

घ. अपि

ङ. श्वः

**योग्यताविस्तारः —**

- आजादचन्द्रशेखरस्य अन्यं वृत्तान्तं पठत।
- आजादचन्द्रशेखरस्य अन्यसहयोगिनां जीवनवृत्तं योगदानं च पठत।
- स्वतन्त्रतासैनिकानां चित्राणि एकत्रीकुरुत।
- स्वकीयनगरस्य ग्रामस्य वा स्वाधीनतासैनिकानां नामानि लिखत।

*इदं राष्ट्राय स्वाहा।*